# कठोपनिषद्

सह नाववतु
सह नौ भुनक्तु
सह वीर्यं करवावहै
तेजस्विनावधीतमस्तु मा विद्विषावहै
ॐ शान्तिः शान्तिः शान्तिः

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ
तस्य ह नचिकेता नाम पुत्र आस १

तँ ह कुमारँ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत २

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः
अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत् ३

स होवाच पितरं तत कस्मै मां दास्यसीति
द्वितीयं तृतीयं तँ होवाच मृत्यवे त्वा ददामीति ४

बहूनामेमि प्रथमो बहूनामेमि मध्यमः
किँ स्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति ५

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः ६

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्
तस्यैताँ शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ७

आशाप्रतीक्षे संगतँ सूनृतां चेष्टापूर्ते पुत्रपशूँश्च सर्वान्
एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे ८

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ९

शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे १०

यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः
सुखँ रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम् ११

स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति
उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते स्वर्गलोके १२

स त्वमग्निँ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यम्
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण १३

प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्
अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम् १४

लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा
स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः १५

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः
तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण १६

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमाँ शान्तिमत्यन्तमेति १७

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाँश्चिनुते नाचिकेतम्
स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके १८

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण

एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व   १९

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः   २०

देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः
अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम्   २१

देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ
वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्   २२

शतायुषः पुत्रपौत्रान्वृणीष्व बहून्पशून्हस्तिहिरण्यमश्वान्
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि   २३

एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि   २४

ये ये कामा दुर्लभा मर्त्यलोके सर्वान्कामाँश्छन्दतः प्रार्थयस्व
इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः
आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः   २५

श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते   २६

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव   २७

अजीर्यताममृतानामुपेत्य जीर्यन्मर्त्यः क्वधःस्थः प्रजानन्
अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत   २८

यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्सांपराये महति ब्रूहि नस्तत्

योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते २९
इति प्रथमेऽध्याये प्रथमा वल्ली १

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषँ सिनीतः
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते १

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः
श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते २

स त्वं प्रियान्प्रियरूपाँश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः
नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः ३

दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ४

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ५

न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ६

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः ७

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात् ८

नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ९

जानाम्यहँ शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्

ततो मया नचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्    १०

कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम्
स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः    ११

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति    १२

एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य
स मोदते मोदनीयꣳ हि लब्ध्वा विवृतꣳ सद्म नचिकेतसं मन्ये    १३

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद    १४

सर्वे वेदा यत्पदमामनन्ति तपाꣳसि सर्वाणि च यद्वदन्ति
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदꣳ संग्रहेण ब्रवीम्योमित्येतत्    १५

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्    १६

एतदालम्बनꣳ श्रेष्ठमेतदालम्बनं परम्
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते    १७

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे    १८

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्
उभौ तौ न विजानीतो नायं हन्ति न हन्यते    १९

अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः    २०

आसीनो दूरं व्रजति शयानो याति सर्वतः
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति २१

अशरीरँ शरीरेष्वनवस्थेष्ववस्थितम्
महान्तं विभुमात्मानं मत्वा धीरो न शोचति २२

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम् २३

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् २४
यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः २५

इति प्रथमेऽध्याये द्वितीया वल्ली २

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः १

यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्
अभयं तितीर्षतां पारं नाचिकेतँ शकेमहि २

आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ३

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ४

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ५

यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा

तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ६

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः
न स तत्पदमाप्नोति सँसारं चाधिगच्छति ७

यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ८

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः
सोऽध्वनः प्रारमाप्नोति तद्विष्णोः परं पदम् ९

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः १०

महतः परमव्यक्तमव्यक्तात्पुरुषः परः
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ११

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः १२

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि १३

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति १४

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तंमृत्युमुखात्प्रमुच्यते १५

नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ सनातनम्
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते १६

य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति १७

इति प्रथमाध्याये तृतीया वल्ली समाप्ता ३

इति प्रथमोऽध्यायः समाप्तः १

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् १

पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते २

येन रूपं रसं गन्धं शब्दान्स्पर्शाँश्च मैथुनान्
एतेनैव विजानाति किमत्र परिशिष्यते एतद्वै तत् ३

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ४

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्
ईशानं भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् ५

यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत
गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत एतद्वै तत् ६

या प्राणेन संभवत्यदितिर्देवतामयी
गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत एतद्वै तत् ७

अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः
देवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः एतद्वै तत् ८

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति
तं देवाः सर्वेर्पितास्तदु नात्येति कश्चन एतद्वै तत् ९

यदेवेह तदमुत्र यदमुत्र तदन्विह
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति १०

मनसैवेदमाप्तव्यं नेह नानास्ति किंचन
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ११

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति
ईशानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् १२

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः एतद्वै तत् १३

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति
एवं धर्मान्पृथक् पश्यंस्तानेवानुविधावति १४

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति
एवं मुनेर्विजानत आत्मा भवति गौतम १५

इति द्वितीयेऽध्याये प्रथमा वल्ली समाप्ता १

पुरमेकादशद्वारमजस्यावक्रचेतसः
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यत एतद्वै तत् १

हँसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् २

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति
मध्ये वामनमासीनं विश्वेदेवा उपासते ३

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः
देहाद्विमुच्यमानस्य किमत्र परिशिष्यत एतद्वै तत् ४

न प्राणेन नापानेन मर्त्यो जीवति कश्चन
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ५

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्
यथा च मरणं प्राप्य आत्मा भवति गौतम ६

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ७

य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् ८

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ९

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च १०

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ११

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति
तमात्मस्थं येऽनुपश्यन्ति घीरास्तेषां सुखं शाश्वतं नेतरेषाम् १२

नित्योऽनित्यानां चेतनश्चेतनानामेको बुहूनां यो विदधाति कामान्
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् १३

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्
कथं नु तद्विजानीयां किमु भाति विभाति वा १४

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति १५

इति द्वितीयेऽध्याये द्वितीया वल्ली समाप्ता २

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन एतद्वै तत् १

यदिदं किं च जगत्सर्वं प्राण एजति निःसृतम्
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति २

भयादस्याग्निस्तपति भयात्तपति सूर्यः
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ३

इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः
ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते ४

यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके
यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके ५

इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति ६

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ७

अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ८

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्
हृदा मनीषी मनसाभिक्लृप्तो य एतद्विदुरसृतास्ते भवन्ति ९

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्   १०

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ   ११

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते   १२

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति   १३

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते   १४

यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः
अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम्   १५

शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति   १६

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति   १७

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव   १८

इति द्वितीयेऽध्याये तृतीया वल्ली समाप्ता   ३

इति द्वितीयोऽध्यायः   २

सह नाववतु

सह नौ भुनक्तु
सह वीर्यं करवावहै
तेजस्विनावधीतमस्तु मा विद्विषावहै
ॐ शान्तिः शान्तिः शान्तिः

इति यजुर्वेदीया कठोपनिषत्समाप्ता